तुलसीविवाहविधि

॥ अथ तुलसीविवाहविधिः प्रारभ्यते ॥

संस्करण : सितंबर २०१९, संवत् २०७६

मूल्य : ५० रुपये मात्र

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
E-mail : khemraj@bharatmail.co.in

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadas
Prop.: Shri Venkateshwar Press, Mumbai-400004
at their Shri Venkateshwar Press,
22, Chintamani Industrial Estate, Ramtekdi, Pune-411013.



श्रीगणेशाय नमः ॥ अथ तुलसीविवाहविधिः ॥ विष्णुयामले । सनत्कुमारसंहितायांच ॥ आ
दावेवाथतुलसींवनेवास्वगृहेपिवा॥मासमात्रेणसंवर्ध्य ततोयजनमारभेत्॥ १ ॥सौम्यायनेप्रकर्त
व्यंगुरुशुक्रोदयेतथा ॥ अथवाकार्त्तिकेमासिभीष्मपंचदिनेतथा ॥२॥ वैवाहिकेषुऋक्षेषुपूर्णिमा
यांविशेषतः ॥ मंडपंकारयेत्तत्रकुंडवेदीविवाहवत्॥ ३ ॥ब्राह्मणंदेशिकंचैवचतुरश्चतथर्त्विजः ॥
ग्रहयज्ञंपुरस्कृत्यमातृणांयजनंतथा ॥४॥ कृत्वानांदीमुखंश्राद्धंसौवर्णंस्थापयेद्धरिम् ॥ कृत्वा
तुरौप्यतुलसींलग्नेह्यस्तमितेरवौ ॥ ५॥ संपूज्यालंकृतांतांचप्रदद्याद्विधितोहरेः ॥ समश्नुतेनमंत्रे
णवस्त्रयुग्मेनवेष्टयेत्।६।यदाबध्नेतिमंत्रेणकंकणंपाणिपल्लवे।कोऽदादितिचमंत्रेणकरग्राहोविधी
यते॥७॥कर्तव्यश्चततोहोमोविशेषाद्विधिपूर्वकम्।आचार्योवेदिकाकुंडेजुहुयाच्चनवाहुतीः ॥८॥
यजमानः सपत्नीकः सहामात्यैश्चगोत्रजैः ॥ प्रदक्षिणाः प्रकुर्वीतचतस्रोविष्णुनासह ॥ ९ ॥
पठेयुःशांतिकाध्यायांस्तथावैष्णवसंस्तवान्॥गायंतुमंगलंनार्योभेरीतूर्यादिनिःस्वनैः ॥१०॥

 गांपीठंचतथाशय्यामाचार्यायनिवेदयेत्।ऋत्विग्भ्योदक्षिणांदद्यात्सदन्नैर्भोजयेद्द्विजान् ॥ ११॥
 एवंप्रतिष्ठितांदेवींविष्णवेयःसमर्पयेत् ॥ आजन्मोपार्जितात्पापान्मुच्यतेनात्रसंशयः ॥१२॥
एवंधात्र्यश्वत्थयोर्विवाहउक्तःसनत्कुमारसंहितायाम् ॥उदीच्यास्तुशम्यश्वत्थयोर्विवाहंविस्तरे
णकुर्वंतिनद्विधिंग्रंथांतेवक्ष्यामि ॥ अथचातुर्थीलालीयप्रयोगपद्धतिः ॥ तत्रादौकार्त्तिकेमासि
विवाहदिनेतत्पूर्वं वा प्रातः मातृयागपुरःसरनांदीश्राद्धंविधायगोधूलीयलग्नेयजमानःस्नातः
शुक्लांबरधरःकृतनित्यक्रियोमंडपेकुशासनेउदङ्मुखउपविश्याऽऽचम्य प्राणानायम्य ॐअद्ये
त्यादिदेशकालौसंकीर्त्य वसिष्ठगोत्रोमाध्यंदिनीयश्चतुर्थीलालशर्माहं ममाऽखिलविधपातक
शमनपूर्वकाभीष्टसिद्धिद्वाराश्रीमहाविष्णुप्रीत्यर्थंतुलसीविवाहंकरिष्ये । तदंगत्वेनगणेशपूजनं
स्वस्तिपुण्याहवाचनंग्रहयज्ञंचकरिष्ये इति संकल्प्यगणेशस्मरणंकुर्यात्।ॐसुमुखश्चैकदंतश्चक
पिलोगजकर्णकः ॥लंबोदरश्चविकटोविघ्ननाशोविनायकः॥ १॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोग

जाननः॥ द्वादशैतानिनामानि यःपठेच्छृणुयादपि ॥२॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा॥
संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ ३ ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजम् ॥ प्रसन्नवदनं
ध्यायेत्सर्वविघ्नोपशांतये॥४॥अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः।सर्वविघ्नहरस्तस्मैगणा
धिपतयेनमः ॥५॥ इतिप्रार्थ्य॥हस्तेपुष्पाण्यादाय॥हेहेरंबत्वमेह्येहि अंबिकात्र्यंबकात्मज॥सि
द्धिबुद्धिपतेत्र्यक्षलक्षलाभपितुःपितः ॥ ६ ॥ नागास्योनागहारस्त्वंगणराजचतुर्भुजः॥भूषितः
स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ ७ ॥ आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः ॥ इहागत्य
गृहाणत्वंपूजांरक्षक्रतुंचमे ॥८ ॥ ॐगुणानांत्वागुणपतिꣳहवामहेप्प्रियाणांत्वाप्प्रियपतिꣳहवा
महेनिधीनांत्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥
ॐभूर्भुवः स्वः सिद्धिबुद्धिसहितगणपतेइहागच्छइत्यावाह्यॐमनोजूतिर्जुषतामाज्यस्यबृहस्प
तिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमंदधातु। विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥इत्यक्षतान्

विकीर्यॐगणपतयेनमइतिषोडशोपचारैः संपूज्य । लंबोदरनमस्तुभ्यं सततंमोदकप्रिय ॥
निर्विघ्नंकुरुमेदेव सर्वकार्येषुसर्वदा ॥ इतिप्रार्थयेत् ॥ अनयापूजयासिद्धिबुद्धिसहितमहागण
पतिः प्रीयताम् ॥ अथस्वस्तिपुण्याहवाचनम् ॥ ॐस्वस्तिनऽइंद्रोवृद्धश्रवाःस्वस्तिनः
पूषाविश्ववेदाः॥स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ ॐपयःपृ
थिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षे पयोधाः पयस्वतीःप्रदिशःसन्तुमह्यम् ॥ २ ॥
ॐविष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिविष्णवे
त्वा ॥ ३ ॥ ॐअग्निर्देवतावातोदेवतासूर्य्योदेवताचंद्रमादेवतावसवोदेवतारुद्रादेवतादित्या
देवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता ॥ ४ ॥ ॐ द्यौःशांतिरं

तरिंक्षꣳशांतिः पृथिवीशांतिरापःशांतिरोषधयःशांतिर्वनस्पतयःशांतिर्विश्वेदेवाःशांतिर्ब्रह्म
शांतिःसर्वꣳशांतिःशांतिरेवशांतिःसामाशांतिरेधि ॥ ९ ॥ इतिस्वस्तिवाचनम्अथपुण्याह
वाचनम्॥अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनाजलपू
र्णकलशंधारयित्वा ॥ दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्यंपुण्याहं
दीर्घमायुरस्त्वितिभवंतोब्रुवंतुइतियजमानः॥ पुण्यंपुण्याहंदीर्घमायुरस्त्वितिद्विजाः॥ ततोब्राह्म
णानांहस्तेषुप्रोक्षितमस्तुशिवाआपःसंतु॥संतुशिवाआपइतिप्रतिवचनम्।सौमनस्यमस्तु अस्तु
सौमनस्यम् अक्षतंचारिष्टंचास्तु अस्त्वक्षतमरिष्टं च।गंधाः पांतु सौमंगल्यंचास्तुइतिभवंतोब्रुवं
तु गंधाः पांतु सौमंगल्यंचास्तुएवंसर्वत्र ॥ अक्षताः पांतु आयुष्यमस्तु पुष्पाणिपांतुसौश्रिय
मस्तु तांबूलानिपांतु ऐश्वर्यमस्तु दक्षिणाःपांतु बहुधनमस्तु॥ततोयजमानःआचार्यादीन्प्रणम्य

श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्त्विति भवंतोब्रुवंतुइतिवदेत्तेचश्रीर्यशोविद्याविन
योवित्तं बहुपुत्रंचायुष्यंचास्तुइत्युक्त्वादीर्घमायुःशांतिःपुष्टिस्तुष्टिश्चास्त्वितियजमानमभिषिंचे
युः॥ व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानांसर्वेषांब्राह्मणानांमनःसमाधीयता
मितियजमानःसमाहितमनसःस्मःइतिद्विजाः।प्रसीदंतुभवंतः।प्रसन्नाःस्मः।ततोयजमानःकुंभा
ज्जलंपातयन्वदेत् ॥ ॐशांतिरस्तु ॐपुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु
आरोग्यमस्तुशिवंकर्मास्तुकर्मसमृद्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु धनधान्यसमृद्धिर
स्तु पुत्रपौत्रसमृद्धिरस्तु इष्टसंपदस्तुअरिष्टनिरसनमस्तु यत्पापंरोगमशुभमकल्याणंतद्दूरेप्रतिह
तमस्तुयच्छ्रेयस्तदस्तुउत्तरेकर्मणिनिर्विघ्नमस्तुउत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराःक्रियाः
शुभाःशोभनाःसंपद्यंतां तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नसंपदस्तु ॥ तिथिकरणमुहूर्त्तनक्षत्रग्रहल
ग्नाधिदेवताःप्रीयंताम्॥ तिथिकरणेसमुहूर्त्तेसनक्षत्रेसग्रहेसाधिदैवतेप्रीयेताम्॥दुर्गापांचाल्यौप्री

येताम्॥अग्निपुरोगाविश्वेदेवाःप्रीयंताम् ॥ इंद्रपुरोगामरुद्गणाःप्रीयंताम्॥ माहेश्वरीपुरोगाउमा
मातरःप्रीयंताम् ॥वसिष्ठपुरोगाःसर्वेऋषिगणाःप्रीयंताम्॥अरुंधतीपुरोगाएकपत्न्यःप्रीयंताम्
विष्णुपुरोगाःसर्वेदेवाःप्रीयंताम् ब्रह्मपुरोगाःसर्वेवेदाःप्रीयंताम्।ब्रह्मचब्राह्मणाश्चप्रीयंताम्।(श्रीस
रस्वत्यौप्रीयेताम्॥श्रद्धामेधेप्रीयेताम् ।भगवतीकात्यायनीप्रीयताम्॥भगवतीऋद्धिकरीप्रीयताम्
॥भगवतीसिद्धिकरीप्रीयताम्॥भगवतीपुष्टिकरीप्रीयताम्॥भगवतीतुष्टिकरीप्रीयताम्।भगवंतौ
विघ्नविनायकौप्रीयेतां)सर्वाःकुलदेवताःप्रीयंताम्॥सर्वाग्रामदेवताःप्रीयंताम्।।सर्वाइष्टदेवताःप्रीयं
ताम्।हताश्चब्रह्मद्विषःहताश्चपरिपंथिनःहताश्चविघ्नकर्तारःशत्रवःपराभवंयांतु।शाम्यंतुघोराणिशा
म्यंतुपापानिशाम्यन्त्वीतयः।शुभानिवर्द्धन्ताम्।शिवाआपःसंतुशिवाऋतवःसंतुशिवाओषधयः
संतु।शिवानद्यःसंतु ॥शिवागिरयःसंतुशिवाअतिथयःसंतुशिवाअग्नयःसंतु।शिवाआहुतयःसंतु
अहोरात्रेशिवेस्याताम्।शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाःसर्वेग्र

हाःप्रीयंताम्॥भगवान्नारायणःप्रीयताम्।भगवान्पर्जन्यःप्रीयताम्।भगवान्स्वामीमहासेनःप्री
यतांपुण्याहकालान्वाचयिष्येइतियजमानः।वाच्यतामितिप्रतिवचनम्॥ततोयजमानःब्राह्मयंपु
ण्यंमहद्यच्चसृष्ट्युत्पादनकारकम् ॥वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः।भोब्राह्मणाःअस्मिन्तुल
सीविवाहाख्ययज्ञकर्मणिपुण्यंपुण्याहंभवंतोब्रुवंतुइतिवदेत्ॐपुण्याहमितित्रिर्विप्राः।ॐपुनन्तुमा
देवजनाःपुनन्तुमनसाधियः पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा॥१॥पृथिव्यामुद्धृतायांतु
यत्कल्याणंपुराकृतम्॥ऋषिभिःसिद्धगंधर्वैस्तत्कल्याणंब्रुवंतुनः।२।भोब्राह्मणाःअस्मिन्तुलसी
विवाहाख्ययज्ञकर्मणिकल्याणंभवंतोब्रुवंतुओंकल्याणमितित्रिः३ओंयथेमाँव्वाचंकल्याणीमाव
दानिजनेभ्यः॥ब्रह्मराजन्याभ्यांशूद्रायचार्यायचस्वायचारणायच ॥१॥सागरस्ययथावृद्धिर्म
हालक्ष्म्यादिभिःकृता ॥सपूर्णसुप्रभावाचतांचऋद्धिंब्रुवंतुनः॥४॥भोब्राह्मणाः अस्मिन्तुलसी

विवाहाख्ययज्ञकर्मणिऋद्धिंभवंतोब्रुवन्तु। ॐ ऋध्यतां३ ॥ ॐ सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृ
ताअभूमदिवंम्पृथिव्याऽअध्यारुहामाव्विदामदेवान्त्स्वर्ज्योतिः।४। स्वस्तिस्तुयाविनाशाख्या
पुण्यकल्याणवृद्धिदा ॥ विनायकप्रियानित्यंतांचस्वस्तिंब्रुवन्तुनः ॥१॥ भोब्राह्मणाःअस्मिन्
तुलसीविवाहाख्ययज्ञकर्मणिस्वस्तिभवंतोब्रुवन्तु ॐ स्वस्ति ३ ॐ स्वस्तिनइन्द्रोवृद्धश्रवाःस्व
स्तिनः पूषाव्विश्ववेदाः। स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ५ ततोयजमानः
अस्मिन्पुण्याहवाचनेन्यूनातिरिक्तोयोविधिःसउपविष्टब्राह्मणानांवचनात्परिपूर्णोस्तुइतिवदेत्
अस्तुपरिपूर्णःइतिविप्रावदेयुः॥इतिपुण्याहवाचनम्। अथाचार्यादिवरणम्। आचार्यंपाद्यादिभिः
संपूज्यहस्तेसाक्षतकुशजलमादायदेशकालौसंकीर्त्य। अमुकगोत्रोत्पन्नोऽमुकशर्माहममुकगोत्रो
त्पन्नममुकशर्माणंब्राह्मणमस्मिंमस्तुलसीविवाहकर्मणिआचार्यत्वेनत्वामहंवृणे वृतोस्मिइतिप्रति

वचनम् ॐ व्रतेनदीक्षामाप्नोतीतिपठेत्। आचार्यस्त्वंयथास्वर्गेशक्रादीनांबृहस्पतिः। तथात्वंमम
यज्ञेस्मिन्नाचार्योभवसुव्रत १ इतिप्रार्थयेत् ॥ एवंब्रह्मत्वेनब्रह्माणमृक्‌ऋत्विक्त्वेनऋत्विजोवरयेत् ॥
यथाचतुर्मुखोब्रह्मासर्वलोकपितामहः ॥तथात्वंममयज्ञेस्मिन्ब्रह्माभवद्विजोत्तम।इतिब्रह्माणंप्रार्थ
येत्।पूर्वमृत्विजश्चयथाशक्रादीनांमखेऽभवन् ॥यूयंतथामेभवतऋत्विजोद्विजसत्तमाः।इतिप्रार्थ
ना॥अथपूर्वादिदिक्षुसर्षपाक्षतविकिरणं। ॐपूर्वेरक्षतुगोविंदआग्नेय्यांगरुडध्वजः।याम्यांरक्षतु
वाराहोनारसिंहस्तुनैर्ऋते॥ १ ॥वारुण्यांकेशवोरक्षेद्वायव्यांमधुसूदनः।उत्तरेश्रीधरोरक्षेदीशानेतु
गदाधरः॥२॥ऊर्ध्वंगोवर्द्धनोरक्षेदधस्ताच्चत्रिविक्रमः।एवंदशदिशोरक्षेद्वासुदेवोजनार्दनः॥३॥
शंखोरक्षेत्तुचयज्ञाग्रेपृष्ठेखड्गस्तथैवच।वामपार्श्वेगदारक्षेद्दक्षिणेतुसुदर्शनः॥४॥ब्रह्माणंमाधवोरक्षे
त्त्वाचार्यंपातुमाधवः।अच्युतोवतुऋग्वेदंयजुर्वेदमधोक्षजः।५। कृष्णश्चसामगंरक्षेदाथर्विकंचमा
धवः॥उपद्रष्टातुयोविप्रस्तंरुद्रोवतुसर्वदा॥ ६ ॥यजमानंसपत्नीकंकमलाक्षश्चरक्षतु ॥ रक्षाहीनं

तुयत्स्थानंतत्सर्वंरक्षतांहारिः॥७॥अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः॥येभूताविघ्नकर्त्तारस्तेन
श्यंतुशिवाज्ञया॥८॥ अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशम्॥सर्वेषामविरोधेनब्रह्मकर्मसमा
रभे॥९॥ एवंरक्षांकृत्वाउदकोपस्पर्शनंचकृत्वायजमानहस्ते ॐयेनराजा बलिर्बद्धो दानवेंद्रोम
हाबलः॥तेनत्वांप्रतिबध्नामिरक्षेमाचलमाचलेतिमंत्रेणकंकणबंधनंकुर्यात्॥अथनवग्रहपूजनम्।
हस्तेपुष्पाण्यादाय मध्यवर्तुलाकारमंडलेसूर्यमावाहयेत्॥ ॐआकृष्णेनरजसावर्तमानोनिवेश
यन्नमृतम्मर्त्यंचहिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥ओंभूर्भुवःस्वःसूर्यइहागच्छ
इहतिष्ठओंसूर्यायनमः १॥ आग्नेय्यांचतुरस्रेमंडलेचंद्रमूइमंदेवाऽअसपत्नुठं॰सुवध्वंमहतेक्षत्रा
यमहतेज्यैष्ठ्यायमहतेजानराज्यायेंद्रस्येंद्रियाय॥ इममुमुष्यैपुत्रममुष्यैपुत्रमस्यैविशऽएषवो
मीराजासोमोस्माकंब्राह्मणानाः राजा॥ॐभूर्भुवःस्वश्चंद्रइहागच्छइहतिष्ठॐचंद्रमसेनमः ॥२॥

दक्षिणेत्रिकोणमंडलेभौमम् ॥ ॐअग्निर्म्मूर्धादिवःककुत्पतिःपृथिव्याऽअयम्॥अपाᳬरेताᳬसि
जिन्वतिॐभूर्भुवःभौमईहा०ॐभौमायनमः ॥३॥ ऐशान्याम् बाणाकारमंडलेबुधम्॥ॐउद्बु
ध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसᳬसृजेथामयंचअस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायज
मानश्चसीदतॐभूर्भुवःस्वर्बुधइहा०बुधायनमः ॥ ४ ॥ उत्तरेचतुरस्रमंडलेगुरुम् ॐबृहस्पतेऽअ
तियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणंधेहि
चित्रम् ॐभूर्भुवःस्वर्बृहस्पतेइहा०ॐबृहस्पतयेनमः ॥५॥ पूर्वेपंचकोणमंडलेशुक्रम् ॥ अन्नात्प
रिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रम्पयःसोमंप्रजापतिः ऋतेनसत्यमिंद्रियंविपानᳬशुक्रमंधसऽइ
न्द्रस्येंद्रियमिदंपयोमृतम्मधुॐभूर्भुवःस्वःशुक्रइहागच्छइहतिष्ठॐशुक्रायनमः ॥ ६ ॥ पश्चिमे

धनुषाकारमंडलेशनैश्चरम् । ॐशन्नोदेवीरभिष्टयऽआपो भवंतुपीतयेशंय्योरभिस्रवंतुनः ॐभूर्भुवःस्वःशनेइहागच्छइहतिष्ठ ॐशनैश्चरायनमः॥७॥ नैर्ऋत्याम् शूर्पाकारमंडलेराहुम्०। ॐकयानश्चित्रऽआभुवदूतीसदावृधः सखाकयाशचिष्ठयावृताॐभूर्भुवःस्वःराहोइहा० ॐराहवे नमः ॥ ८ ॥ वायव्याम् ध्वजाकारमंडलेकेतुम् ॥ॐकेतुंकृण्वन्नकेतवेपेशोमर्याअपेशसेऽ समुष द्भिरजायथाःॐभूर्भुवःस्वःकेतोइहागच्छइहतिष्ठॐकेतवेनमः।९॥एवंग्रहाणामावाहनंस्थापनंच कृत्वानाममंत्रेणयथाविधिपूजयेत् ॥ तत ईशान्यांग्रहकलशंस्थापयेत्॥तत्रप्रयोगःॐभूरसीति भूमिस्पर्शनम् ॥ ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्रीपृथिवींयच्छपृथि वींदृंहपृथिवीम्माहिंसीः॥१॥तत्रधान्यमसीति धान्यंक्षिपेत॥ॐधान्यमसिधिनुहिदेवान् प्राणायत्वोदानायत्वाव्यानायत्वादीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिःप्रति


गृभ्णात्वच्छिद्रेणपाणिना चक्षुषेत्वामहीनाम्पयोसि ॥२॥ तस्योपरिॐआजिघ्रेतिकलशंस्थाप
येत्ॐआजिघ्रकलशंमह्यात्वाविशन्त्विंदवःपुनरूर्जानिवर्त्तस्वसानःसहस्रंधुक्ष्वोरुधारापयस्व
तीपुनर्माविशताद्रयिः ॥३॥ वरुणस्योत्तमित्युदकंक्षिपेत् ॥ ॐवरुणस्योत्तम्भनमसिवरुणस्य
स्कंभसर्ज्जनीस्थोव्वरुणस्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमा
सीद ॥ ४ ॥ वसोःपवित्रेतिवस्त्रम् कंठेवेष्टयेत् ॥ ॐवसोःपवित्रमसिशतधारंवसोःपवित्रमसि
सहस्रधारं देवस्त्वासवितापुनातुवसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः ॥ ५ ॥ याःफलिनी
रितिपूगीफलम् ॥ ॐयाःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूता
स्तानोमुंचंत्वꣳहसः ॥ ६ ॥ परिवाजेतिपंचरत्नानि ॥ ॐपरिवाजपतिःकविरग्निर्हव्यान्य

क्रमीतृदुधद्रत्नानिदाशुषे ॥ ७ ॥ हिरण्यगर्भेतिहिरण्यम् ॥ हिरण्यगर्भःसमवर्त्ततागेभूत
स्यंजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ ८ ॥
गंधद्वारामितिगंधम् गंधद्वारांदुराधर्षानित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामिहोपह्व
येश्रियम् ॥ ९ ॥ याऽओषधीरितिसर्वौषधीःॐयाऽओषधीःपूर्वाजातादेवेभ्यंस्त्रियुगम्पुरामनै
नुबभ्रूणामहंᳪ शतंधामानिसप्तचं ॥ १० ॥ स्योनापृथिवीतिसप्तमृदः ॥ ॐस्यो
नापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ ११ ॥ काण्डात्कांडादिति
दूर्वाः ॥ ॐकाण्डात्काण्डात्प्ररोहंतीपरुषः परुषस्परि।एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥१२॥
अश्वत्थेवइतिपंचपल्लवान् ॥ अश्वत्थेवो निषदनम्पर्णेवोवसतिष्कृता गोभाजऽइत्किलासथय

त्सनवथपूरुंषम् ॥ १३ ॥ पवित्रेस्त्थइतिपवित्रंक्षिपेत् ॥१४॥पूर्णादर्वीतिपूर्णपात्रम् ॥ॐपूर्णा
दर्विंपरापतसुपूर्णापुनरापंतवस्नेवविक्रीणांवहाऽइषमूंर्जर्ठ० शतक्रतो॥१५॥ श्रीश्चतेतिश्रीफल
म्ॐमनोजूतिर्जुषंतामाज्यंस्यबृहस्पतिर्य्यंज्ञमिमंतंनोत्वरिष्टंयज्ञर्ठंसमिमंदंधातुविंश्वेदेवासंऽइह
मादयन्तामोऽम्प्रतिष्ठइत्यक्षतान्विकीर्य।तत्रगणानांत्वेतिगणपतिंतत्त्वायामीतिवरुणंचावाह्य।
ॐगणानांत्वागणपतिर्ठंहवामहेप्रियाणांत्वाप्रियपतिर्ठंहवामहेनिधींनांत्वानिधिपंतिर्ठंहवामहेव
सोममआहमंजानिगर्ब्भधमात्वमजासिगर्भधम्।ॐतत्त्वायामिब्रह्मणावंदमानस्तदाशांस्तेयजं
मानोहविर्भिंःअहेडंमानोवरुणेहबोध्युरुंशर्ठंसमानऽआयुःप्रमोंषीःॐभूर्भुवःस्वर्गणेशवरुणचइ
हागच्छइहतिष्ठ।ॐगणेशशवरुणाभ्यांनमः।इतिषोडशोपचारैःपूजयेत्।ततोगंगाद्यावाहनम्।सर्वे

समुद्राःसारितस्तीर्थानिजलदानदाः ॥ आयांतुयजमानस्यदुरितक्षयकारकाः॥ १ ॥(कलशा
भिमंत्रणम्) कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाः
स्मृताः ॥२॥ कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदः सामवेदोप्यथर्वणः ॥
अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥३॥ (कलशप्रार्थना) देवदानवसंवादेमथ्यमानेमहो
दधौ ॥ उत्पन्नोसियदाकुंभविधृतोविष्णुनास्वयम् ॥४॥ त्वत्तःसर्वाणितीर्थानिदेवाःसर्वेत्वयि
स्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥५॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वं
चप्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥ ६ ॥ सर्वेपित्वयितिष्ठंतियतःकाम
फलप्रदाः ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥७॥ सांनिध्यंकुरुमेदेवप्रसन्नोभवसर्वदा॥
इतिकलशस्थापनम् ॥ ततः तुलस्या आलवालंपरितोमंडपंकृत्वा विवाहवत्तत्रतुलसीपुरतो
षड्वप्रांवेदींचकृत्वावेद्यांसर्वतोभद्रेहैमंविष्णुंरौप्यमयींतुलसींचअग्न्युत्तारणपूर्वकंस्थापयेत् ॥

तत्रमंत्रौॐइदंविष्णुर्विचंक्रमेत्रेधानिदंधेपदंसमूंढमस्यपांसुरे ॐभूर्भुवःस्वर्विष्णोइहागच्छ ॥
तुलसिश्रीसखिशुभपापहारिणिपुण्यदे ॥ नमस्तेनारदनुते नारायणसदाप्रिये ॐभूर्भुवः स्वस्तु
लसिइहागच्छ इतिसंस्थाप्यपुरुषसूक्तेनपूजयेत् ॥ तत्रप्रयोगः ॥ आचम्य प्राणानायम्य
देशकालौसंकीर्त्यममसर्वपातकनिवृत्तये श्रीविष्णुप्रीतयेचतुलसीविवाहांगतयापुरुषसूक्तेनषो
डषोपचारैर्महाविष्णुपूजांकरिष्ये इतिसंकल्प्य ॐआगच्छभगवन्देवअर्चयिष्यामिकेशव ॥
तुभ्यं दास्यामितुलसींसर्वकामप्रदोभव ॥ ॐसुहस्रंशीर्षा
पुरुषःसहस्राक्षःसुहस्रंपात्सभूमिंर्ठंसर्वुतंस्पृत्वात्यंतिष्ठद्द
शाङ्गुलम् विष्णवेनमः आवाहनम् ॥ १ ॥ ॐपुरुं
षऽएवेदर्ठं सर्वंयद्भूतंयंच्चभाव्यंम् । उतामृंतत्वस्येशांनोय
दन्नेनातिरोहंति ॥ विष्णवेनमः आसनंसमर्पयामि ॥२॥



दिक्‌मा०

एवंसर्वत्रज्ञेयम् ॐएतावानस्यमहिमातोज्यायांश्चपूरुषः। पादोस्यविश्वाभूतानित्रिपादस्या
मृतंदिवि इतिपाद्यम्॥३॥त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनःततोविष्वङ्व्यक्रामत्सा
शनानशनेऽअभि इत्यर्घ्यं ॥ ४ ॥ ततोविराडजायतविराजोऽअधिपूरुषःसजातोऽअत्यरि
च्यतपश्चाद्भूमिमथोपुरः इत्याचमनम्५॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यम्।पशूँस्तांश्चक्रे
वायव्यानारण्याग्राम्याश्चये इतिस्नानम्॥६॥पंचामृतस्नानंपृथक्पृथङ्मंत्रैःकारयेत् ॥तस्मा
द्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे।छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत।इतिवस्त्रम्७ त
स्मादश्वाऽअजायन्तयेकेचोभयादतःगावोहजज्ञिरे तस्मात्तस्माज्जाताऽअजावयः।इतियज्ञोपवी
तम्८तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये इतिगंधम्।९।

तुल० ॥११॥

यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् । मुखङ्किमस्यासीत्किंबाहूकिमूरूपादाऽउच्येते इतिपुष्पा
णि॥१०॥ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः।ऊरूतदस्ययद्वैश्यः पद्भ्याᳬशूद्रोऽअजा
यत ॥ इतिधूपम् ॥ ११ ॥ चंद्रमामनसोजातश्चक्षोःसूर्योऽअजायत॥श्रोत्राद्वायुश्चप्राणश्चमु
खादग्निरजायत ॥ इतिदीपम् ॥ १२ ॥ नाभ्याऽआसीदंतरिक्षᳬ शीर्ष्णोद्यौःसमवर्त्तत ॥
पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन् ॥ इतिनैवेद्यम् ॥ १३ ॥ यत्पुरुषेणह
विषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥ इतिनमस्कारः ॥
॥ १४ ॥ ॐसप्तास्यासन्परिधयस्त्रिःसप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्न
न्पुरुषंपशुम् ॥ इतिप्रदक्षिणाम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमा
न्यासन्॥तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः॥ इतिपुष्पांजलिः॥१६ ॥

विवा० ॥११॥

एवंसंपूज्य अथाचारात्तुलसीसंमुखांश्रीकृष्णप्रतिमांकृत्वा मंगलवाद्यैःसुगंधितैलहारिद्राभ्यांनागवल्लीदलगृहीताभ्यामुष्णोदकेनाभिषिच्यवस्त्रयज्ञोपवीतचंदनंदत्त्वा तुलस्यैहरिद्राकुंकुमाक्तकंठसूत्राद्यलंकारान्दत्त्वाघण्टादिवाद्यघोषेण ॐ यदाबध्नंदाक्षायणा हिरण्यꣳशतानीकायसुमनस्यमानाः तन्मऽआबध्नामिशतशारदायायुष्मांजरदष्टिर्यथासम्इतिमंत्रेणोभयोःकंकणंबद्धानुतिंकुर्यात् ॥ततोयथापरिमितेतुषकेशशर्करादिरहितेकुंडेस्थंडिलेवाचतुरस्रांभूमिंकुशैःपरिसमुह्य तान्कुशानैशान्यांपरित्यज्यगोमयोदकेनोपलिप्यस्रुवमूलेनप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्य॥उल्लेखनक्रमेणैवानामिकांगुष्ठाभ्यांमृदमुद्धृत्यजलेनाभ्युक्ष्य ततः कांस्यपात्रस्थंवह्निंद्वितीयकांस्यपात्रेणपिहितंप्रत्यङ्मुखमुपसमाधाय अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवेदेवाँऽआसादयादिह इति मंत्रेणस्थापयेत् तद्रक्षार्थंकिंचिन्नियुज्य आनीताग्निपात्रेजलादिप्रक्षे

पः ततोऽग्निं संपूज्य विष्णोर्मधुपर्कपूजां कुर्यात् ॥ तत्रादौ यजमानः पाद्यमंजलिनादाय ॐ पाद्यं पाद्यंपाद्यं विष्णवे नम इति विष्णोः पादौ प्रक्षाल्य ॥ ततो दूर्वाक्षतपुष्पफलचन्दनयुतमर्घपात्रं गृहीत्वा ॐ अर्घोऽर्घोऽर्घ इत्युक्त्वा विष्णवे नमः अर्घ्यमिति निवेदयेत् ॥ तत आचमनीयमाचमनीयमाचमनीयं विष्णवे नम इत्याचमनं दत्त्वा ततः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितानि आदाय ॐ मधुपर्को मधुपर्को मधुपर्क इत्युक्त्वा ॐ विष्णो दधिघृतं क्षीरं कांस्यपात्रपुटीकृतम् ॥ मधुपर्कं गृहाण त्वं वासुदेव नमोस्तु ते इति मधुपर्कं दद्यात् एवं मधुपर्कादिना विष्णुं संपूज्य तुलसीपूजनं कुर्यात् तद्यथा आचम्य प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वरप्रीत्यर्थं ममाखण्डितसुखसौभाग्यसन्तत्यायुरारोग्यैश्वर्याभिवृद्धिद्वारा श्रीतुलसीदेवताप्रीत्यर्थं तुलसीपूजनमहं करिष्ये इति संकल्प्य ध्यानं कुर्यात् ॥ ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम् ॥ प्रसन्नां पद्मवदनां वरदां च चतुर्भुजाम् ॥ किरीटहारकेयूरकुंडलादिविभूषणाम् ॥ धवलांकुशसंयुक्तां पद्मासन

निषेविताम् ॥ प्रियांचसर्वदाविष्णोः सर्वदेवनमस्कृताम् ॥ तुलस्यैनमः ध्यायामि इतिध्या
नम् ॥ १ ॥ देवित्रैलोक्यजननि सर्वलोकैकपावनि ॥ आगच्छवरदेमातः प्रसीदतुलसि
प्रिये ॥ श्रीतुलस्यैनमः आवाहनम् इत्यावाहनम् ॥ २ ॥ सर्वदेवमयेदेविसर्वदाविष्णुव
ल्लभे ॥ देविस्वर्णमयंदिव्यंगृहाणासनमव्यये ॥ श्रीतुलस्यैनमः आसनम् इत्यासनम् ॥ ३ ॥
सर्वदेवायथास्वर्गेतथात्वंभुविसर्वदा ॥ दत्तंपाद्यंगृहाणेदं तुलसित्वंप्रसीदमे॥इतिपाद्यम् ॥४॥
गंधपुष्पसमायुक्तंसर्वेषांप्रीतिदायकम्॥अर्घ्यंगृहाणत्वंदेवि दैत्यान्तकरणप्रिये॥इत्यर्घ्यम्॥५॥
कर्पूरवासितंतोयं सुवर्णकलशेस्थितम् ॥ दत्तमाचमनीयंचगृहाणहरिवल्लभे ॥ इत्याचमनम् ॥
॥ ६ ॥ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः॥स्नापितासिमयादेवि तथाशांतिंकुरुष्वमे॥इति
स्नानम् ॥ ७ ॥ पंचामृतंमयानीतंपयोदधिघृतंमधु ॥ सहशर्करयादेविस्नानार्थंप्रतिगृह्यताम्॥
इतिपंचामृतस्नानम् ॥ ८ ॥ शुद्धस्नानंसमर्पयामि ॥ क्षीरोदमथनोद्भूते चंद्रलक्ष्मीसहोदरे॥

गृह्यतां।परिधानार्थमिदंक्षौमाम्बरंशुभे॥इतिवस्त्रम्॥९॥कचुकीमुपवस्त्रंच नानारत्नैःसमन्वितम्।
गृहाणत्वंमयादत्तंतुलसीभवहारिणी ॥ इतिकंचुकीम् ॥ १० ॥ केशरागुरुसंयुक्तंचंदनादिस
मन्वितम् ॥ कस्तूरिकासमायुक्तं कुंकुमंप्रतिगृह्यताम्॥इति कुंकुमम् ॥ ११ ॥ अक्षतांश्चमहादे
वि तुलसि सौख्यदायिके ॥ अर्पयामिसदाभक्त्यासुखसंततिलब्धये ॥इत्यक्षतान् ॥ १२ ॥
हरिद्रांकुंकुमंचैव सिंदूरंकज्जलान्वितम्॥मयानिवेदितंभक्त्यागृहाणपरमेश्वरि॥ इतिसौभाग्यद्र
व्यम् ॥ १३ ॥ माल्यादीनिसुगन्धीनिमालत्यादीनिसत्तमे ॥ मयाहृतानिपूजार्थंपुष्पाणिप्र
तिगृह्यताम्॥ इतिपुष्पाणि ॥ १४ ॥वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवा
नांधूपोयंप्रतिगृह्यताम् ॥ इतिधूपम् ॥ १५ ॥ वैश्वानरप्रज्वलितंघृतकार्पासनिर्मितम् ॥ दीपंभ
क्त्यागृहाणेमंत्रैलोक्यध्वांतनाशिके ॥ इतिदीपम् ॥ १६ ॥ अन्नंचतुर्विधंस्वादु रसैःषड्भिः
समन्वितम् ॥ नैवेद्यार्थेर्पयामित्वांतुलसींमाधवप्रिये ॥ १७॥ इतिनैवेद्यम् ॥ (नैवेद्यांतेआच

मनीयंसमर्पयामि) पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतम् ॥ कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्य
ताम्॥इतितांबूलम् ॥ १८ ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतः
शांतिंप्रयच्छमे ॥ इतिदक्षिणाम् ॥ १९ ॥ ततःकर्पूरार्त्तिक्यम् ॥ नीराजयामिसततंहारिवल्लभे
वैकर्पूरवर्तिभिरलंसुखदायिकेत्वाम्॥ पादौभजाम्यविरतंतवदेविमाये वंशायसौख्यमपिदेहिब
लंचपूर्णम्॥ २० ॥यानिकानिचपापानिजन्मांतरकृतानिच ॥ तानिसर्वाणिनश्यंतिप्रदक्षिणप
देपदे ॥इतिप्रदक्षिणा ॥ २१ ॥ विष्णुप्रियकरेदेवितुलसिसुखदायिके ॥ पुष्पांजलिंप्रयच्छामि
पतेरायुष्यवर्द्धिके॥इतिपुष्पांजलिः ॥२२॥ अथप्रार्थना ॥ सौभाग्यंसंततिंदेविधनंधान्यंचमे
सदा ॥ आरोग्यंशोकशमनंकुरुमेमाधवप्रिये ॥ १ ॥ अभीष्टफलसिद्धिंचसदादेहिहरिप्रिये ॥
देवैस्त्वंनिर्मितापूर्वमर्चितासिमुनीश्वरैः ॥ २ ॥ अतोमांसर्वदाभक्त्याकृपादृष्ट्याविलोकय ॥
पतेरायुश्चभाग्यंचसदादेहिहरिप्रिये ॥ ३ ॥ पूतनाभयसंत्रासाद्रक्षितश्चयथाहरिः ॥ तथासंसार

संत्रासाद्रक्षमेवंशमुत्तमम् ४ अनेनमयायथाशक्त्याकृतेनपूजमेनश्रीतुलसीदेवताप्रीयतांनमम॥
एवंतुलसींसंपूज्यतुलसीसंमुखांश्रीकृष्णप्रतिमांकृत्वामध्येन्तःपटंधृत्वामंगलाष्टकपद्यानिपठेत
अथतुलसीमंगलम् ॥ श्रीमत्कार्तिकशुक्लगातिथिवराचैकादशीद्वादशीतस्यांगोरजलग्नकेवधु
वरौसाक्षाज्जगन्नायकौ ॥ श्रीकृष्णस्तुलसीविवाहमकरोत्तस्मिन्विवाहोत्सवेतौदेवौभवतांसदा
शुभकरौलक्ष्मीकरौमंगलम् ॥१॥ ततोंतःपटंविसृज्यअक्षतान्विकीर्यदामोदरहस्तेतुलसीदानं
कुर्यात् । तद्यथा उदङ्मुखउपविश्यआचम्यप्राणानायम्य शंखस्थदूर्वाक्षतफलपुष्पचंदनजला
न्यादायदेशकालौसंकीर्त्यश्रीवसिष्ठगोत्रोत्पन्नश्रीचतुर्थीलालशर्माहं ममेहजन्मनिजन्मांतरे
वाकृतकायिकवाचिकमानसिकसांसर्गिकदोषपरिहारार्थंतथाचविष्णुप्रसन्नतार्थं श्रीवसिष्ठगो
त्रस्यत्रिप्रवरस्यजीवराजशर्मणःप्रपौत्रीं वसिष्ठगोत्रस्यत्रिप्रवरस्यरामकृष्णशर्मणः पौत्रीं व
सिष्ठगोत्रस्यत्रिप्रवरस्यकस्तूरीचन्द्रशर्मणः पुत्रीम् इत्यनेनक्रमेणत्रिरावर्त्यकश्यपगोत्रायदामो

॥१४॥

दरायमहाविष्णवेवरायकन्यावत्संवर्द्धितामिमांतुलसीं श्रीरूपिणींयथाशक्त्यलंकृतांतुभ्यंश्रीध
रायाहंसंप्रददे इतिसंकल्प्य देवपुरतः साक्षतजलंक्षिपेत् ॥ श्रीमहाविष्णुःप्रीयतामित्यु
क्त्वाइमांदेवींप्रतिगृह्णातुभवानितिवदेत् ततोदेवहस्तंतुलस्याःस्पर्शंकृत्वापठेत् । अनादिमध्य
निधनत्रैलोक्यपरिरक्षक ॥ इमांगृहाणतुलसींविवाहविधिनेश्वर ॥ १ ॥ पार्वतीबीजस
भूतांवृन्दाभस्मनिसंस्थिताम् ॥ अनादिमध्यनिधनांवल्लभांतेददाम्यहम् ॥ २ ॥ पयो
घटैश्चसेवाभिःकन्यावद्वर्धितामया ॥ त्वत्प्रियांतुलसींतुभ्यंदास्यामित्वंगृहाणभोः ॥ ३ ॥
(तुलसीप्रार्थना) त्वंदेविमेऽग्रतोभूयास्तुलसिदेविपार्श्वयोः ॥ देवित्वंपृष्ठतोभूयास्त्वद्दाना
न्मोक्षमाप्नुयाम् ॥ १ ॥ इतिसंप्रार्थ्यपुनस्तौपूज्य कोदात्कस्मेतिपठेत् ॥ ततः कृतैतत्तुलसीदा
नप्रतिष्ठासिद्ध्यर्थमिमांसुवर्णंदक्षिणांतुभ्यंदामोदरायसंप्रददे इतिदेवपुरतोदक्षिणामर्पयेत् ॥
ततःस्वस्तिनोमिमीताशन्नइत्यादिशांतिसूक्तानिचपठेयुः ॥ ॐस्वस्तिनोमिमीतामश्विनाभगः

स्वस्तितेवदंतिनिर्विण्णाःस्वस्तिनः पूषाआशुदधातुस्वस्तिनःद्यावापृथिवीसुचिनुतः स्वस्ति
वायुमैंव्रतायमहीचस्वस्तिभुवनस्पतिः बृहस्पतिंसर्वगुणंस्वस्तिआदित्यासोभवंतुनः ॥
वैश्वानरोवसुगण्यंस्वस्तिदेवी अभयंस्वस्तिनोमित्रावरुणास्वस्तिपंथारेवतीस्वस्तिनोआदि
त्याकृधिस्वस्तिऋभुक्षामानुचरमसूर्यायचंद्रमसायपुनर्दतायअघ्नितायजानतायसंगमेमहीमद्धु
तंवायसदेवानांविसूर्गन्यामिद्रंअभयंसततंवृद्धिःअयंभूमिश्चमनसारक्षतुप्राणायस्वस्तिसंवादेशु
भंनोवृद्धिः॥इतिस्वस्त्ययनम् ॥ शन्नोव्वातःपवताꣳशन्नस्तपतुसूर्य्यःशन्नःकनिक्रदद्देवꣳपर्ज्ज
न्योऽअभिवर्षंतु ॥ १ ॥ ॐ शन्नऽइंद्राग्नीभवतामवोभिः शन्नऽइन्द्राव्वरुणरातहव्व्या शन्न
ऽइन्द्रापूषणाव्वाजसातौशमिन्द्रासोमासुवितायशंयोः ॥२॥ ॐशन्नोदेवीरभिष्टयऽआपोभवं
तुपीतये। शंयोरभिस्रवंतुनः॥३॥इतिशांतिकमंत्राः॥ ततोऽग्नेर्दक्षिणतःशुद्धमासनंदत्त्वातदुपरि
प्रागग्रान्कुशानास्तीर्यब्रह्माणमग्निप्रदक्षिणक्रमेणानीय अस्मिन्कर्मणित्वंमेब्रह्माभवइत्यभिधाय

कल्पितासने उपवेशयेत् ॥ ततःप्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्णंकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याऽग्नेरुत्तरतः कुशोपरिनिदध्यात् ॥ ततः परिस्तरणम् ॥ बर्हिषश्चतुर्थभागमादाय ॥ आग्नेयादीशानांतंब्रह्मणोग्निपर्यंतंनैर्ऋत्याद्वायव्यांतंअग्नितःप्रणीतापर्यंतं ततोग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयं॥पवित्रकरणार्थंसाग्रमनंतर्गर्भंकुशपत्रद्वयं ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥चरुस्थाली॥संमार्जनकुशास्त्रयः॥ उपयमनकुशास्त्रिप्रभृतयः॥ समिधस्तिस्रः॥ स्रुवः ॥ आज्यं ॥ तंडुलपूर्णपात्रं ॥ पवित्रच्छेदनकुशानांपूर्वंपूर्वंदिशिक्रमेणासादनीयं ॥ ततस्त्रिभिःकुशैः द्वेकुशेछित्वापवित्रकरणंसपवित्रहस्तेनप्रणीतोदकंत्रिः प्रोक्षणीपात्रेनिक्षिप्य प्रोक्षणीपात्रजलंपवित्रेणत्रिरुत्पवनंपुनःप्रणीतोदकेनप्रोक्षणीप्रोक्षणं प्रोक्षणीजलेनयथासादितवस्तुसेचनं अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधाय ॥ आज्यस्थाल्यामाज्यंनिरूप्यततोऽधिश्रपणंततोज्वलदुल्मुकंप्रदक्षिणमाज्यस्योपरिभ्रामयित्वा वह्नौप्रक्षिप्यस्रुवप्रतपनंकृत्वासंमार्ज

तुल० नकुशैः संमार्ज्यप्रणीतोदकेनाभिषिच्यपुनःप्रतप्यदक्षिणतोनिदध्यात् आज्यस्याग्नेरवतारणं विवा०
॥१६॥ प्रोक्षणीवदुत्पवनं अवेक्ष्यसत्यपद्रव्येतन्निरसनंपुनरुत्पवनं तत उपयमनकुशानादायउत्तिष्ठन्
प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताःसमिधस्तिस्रःप्रक्षिपेत् तत उपविश्य प्रोक्षण्युदके
नाग्निपर्युक्ष्यप्रणीतापात्रेपवित्रंनिधायदक्षिणजान्ववाच्य ब्रह्मणान्वारब्धः समिद्धतमेग्नौस्रुवे
णाज्याहुतीर्जुहुयात् (तत्राघारादाराभ्यद्वादशाहुतिषुतत्तदाहुत्यनन्तरंस्रुवावस्थितहुतशेषस्य
प्रोक्षणीपात्रेप्रक्षेपः) तद्यथा ॥ ॐप्रजापतयेस्वाहा इदंप्रजापतये ॥ १ ॥ इतिमनसा ॐ इन्द्रा
यस्वाहा इदमिंद्राय ॥ २ ॥ इत्याघारौ ॐ अग्नयेस्वाहा इदमग्नये ॐ सोमायस्वाहा इदं
सोमाय इत्याज्यभागौ ॐभूःस्वा इदंभूः ॐभुवःस्वाहा इदंभुवः ॐस्वः स्वाहा इदंस्वः।एता
महाव्याहृतयः ॥ ॐत्वन्नोऽअग्नेवरुणस्यविद्वान् देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नि ॥१६॥
तमः शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्युस्मत्स्वाहाइदमग्नीवरुणाभ्याम्॥१॥ ॐसत्वन्नोअग्ने

व्वमोभंवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौऽअवंयक्ष्वनोव्वरुणठं ररोणोव्वीहिमृंडीकठंसुहवोन
नऽएधिस्वाहाइदमग्नीवरुणाभ्याम् ॥ २ ॥ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाअसि
अयानोयज्ञंवहास्ययानोधेहिभेषजठंस्वाहा इदमग्नये ॥ ३ ॥ ॐयतेशतंवरुणयेसहस्रंयज्ञियाः
पाशाविततामहान्तः। तेभिर्नोऽअद्यसवितोतविष्णुर्व्विश्वेमुञ्चन्तुमरुतःस्वर्काःस्वाहाइदंसवित्रे
विष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ४।ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमठंश्रथा
य॥अथाव्वयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहाइदंवरुणाय।५।इतिद्वादशाहुतयः॥
ततोऽग्निप्रोक्षणम्॥ततोद्वादशाक्षरमंत्रेणवाअष्टाक्षरमंत्रेणसहस्रमष्टोत्तरशतंवाज्याहुतीर्जुहुयात्।
ॐनमोभगवतेवासुदेवायस्वाहा इदंविष्णवे ॥ १ ॥ ॐनमोनारायणायस्वाहाइदंविष्णवे ॥
ततःपुरुषसूक्तेनषोडशाहुतीःसाज्यक्षौद्रतिलैर्हुत्वाज्येन ॐअग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्वि

ष्टकृते॥ इतिस्विष्टकृद्धोमः ॥ ततःसंस्रवप्राशनमाचमनंच। ॐअद्यकृतैतत्तुलसीविवाहहोमकर्म प्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ इति पूर्णपात्रंदद्यात् ॥ स्वस्तीतिप्रतिवचनम् ॥ एवमेवाचार्यायहिरण्यदक्षिणांदद्यात्ततोब्रह्मग्रंथिवि मोकः। ॐसुमित्रियानऽआपुओषधयःसंतु इतिपवित्रंगृहीत्वाप्रणीताजलेनशिरःसंमृज्यॐदु र्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतांन्युब्जीकुर्यात् ततआस्तर णक्रमेणबर्हिरुत्थाप्याज्येनाभिघार्यहस्तेनैवजुहुयात्तत्रमंत्रः ॐदेवागातु विदोगातुंवित्वागातु मितमनसस्पत। इमंदेवयज्ञꣳस्वाहावातेधाःस्वाहाततउत्थाय। ॐमूर्द्धानंदिवोऽअरतिंपृथिव्यावै श्वानरमृतआजातमग्निम्। कविꣳसंम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः स्वाहाइदमग्नये इतिपूर्णाहुतिंदत्त्वाउपविश्यस्रुवेणभस्मानीय ॥ दक्षिणानामिकाग्रगृहीतभस्मनात्र्यायुष्करणम् ॐत्र्यायुषंजमदग्नेरितिललाटे। ॐकश्यपस्यत्र्यायुषमितिग्रीवायांॐयद्देवेषुत्र्यायुषमितिदक्षिणांसे

तन्नोअस्तुत्र्यायुषमितिहृदि॥ततोयजमानश्वतस्रःप्रदक्षिणाःकृत्वाशांतिपाठादिपठित्वातूर्यादि
घोषपूर्वकंयथाविभवेनविष्णुंतुलसींचसंपूज्यगुरवेधेनुंपीठंचऋत्विग्भ्योदक्षिणांचदत्त्वादेववि
सर्जनं कृत्वाब्राह्मणान्भोजयेत् ॥ कर्मपूर्तिकामोविष्णुंस्मरेत् ॐयस्यस्मृत्याचनामोक्त्या
तपोयज्ञक्रियादिषु ॥न्यूनंसम्पूर्णतांयातिसद्योवन्देतमच्युतम् ॥ अनेनकर्मणादामोदरःप्रीयता
म्॥सनत्कुमारसंहितायांस्वशाखोक्तेनविधिना।तुलस्याःकरपीडनम्॥कन्यादानफलंतस्यजाय
तेनात्रसंशयः ॥१॥कुर्यादितिशेषः ॥ सौभाग्यार्थंधनार्थंचविद्यार्थंतुनिवृत्तये॥सन्तत्यर्थंप्रकर्त्त
व्यंतुलस्याःपाणिपीडनम् ॥ २ ॥ श्रीरामकृष्णपौत्रेण कस्तूरीचन्द्रसूनुना ॥ कृताचतुर्थीलाले
नपद्धतिर्हरिप्रीतये ॥ १ ॥ अथशम्यश्वत्थयोर्विवाहविधिः ॥ पूर्वोक्ततुलसीविवाहमासादिषु
विवाहदिनेप्रातर्मातृयागपुरःसरंनान्दीश्राद्धंविधायगोधूलीयलग्नेयजमानःस्नातःशुक्लाम्बरा
दिधरःकृतनित्यक्रियःस्वासनेउदङ्मुखउपविश्यआचम्यप्राणानायम्य॥ अद्येत्यादिदेशकालौ

संकीर्त्यामुकगोत्रोमुकशर्माहंममाऽखिलविघपातकशमनपूर्वकाभीष्टसिद्धिद्वाराश्रीपरमेश्वरप्री त्यर्थमश्वत्थविवाहं करिष्ये इतिसंकल्प्य ॐ सुमुखश्चेत्यादिनापूर्वोक्तमार्गेणगणेशादीन् संपूज्यस्वस्तिपुण्याहवाचनमाचार्यादिवरणंसर्षपाक्षतविकिरणंग्रहयज्ञादिचपूर्ववत्कृत्वासर्व तोभद्रेविष्णुप्रतिमांसंस्थाप्यपुरुषसूक्तेनसंपूज्यअग्निंस्थापयेत् । ततःशम्यश्वत्थयोरन्वारब्धं कृत्वामंगलवाद्यैःसुगंधितैलहरिद्राभ्यामुष्णोदकेनाभिषिच्यवस्त्रादिनावेष्ट्य यज्ञोपवीतचंदनं दत्त्वाशम्यैहरिद्राकुंकुमाक्तसूत्राद्यलंकारान्दत्त्वाघंटादिवाद्यघोषेणअश्वत्थपूजांकुर्यात् ॥ तत्र क्रमः आचम्यप्राणानायम्यामुकगोत्रोऽमुकशर्माहंपरमेश्वरप्रीत्यर्थमश्वत्थपूजनं करिष्यइतिसंक ल्प्यॐअश्वत्थायवरेण्यायसर्वैश्वर्यप्रदायिने।अंततःशिवरूपायवृक्षराजायतेनमः।ॐअश्वत्था यनमआवाहनम् ॥ १ ॥ मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे ॥ नमोदुःस्वप्ननाशायसुस्व प्नफलदायिने॥ॐअश्वत्थायनमआसनम् ॥ २॥अग्निगर्भःशमीगर्भोदेवगर्भःप्रजापतिः ॥ हिर

ण्यगर्भोभूगर्भोयज्ञगर्भोनमोस्तुते ॥ ओं अश्वत्थायनमः पाद्यम् ॥३॥ (एवंसर्वत्र) आयुर्बलंय
शोवर्चःप्रजाःपशुवसूनिच ॥ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ इत्यर्घ्यम् ॥४ ॥ त्वंक्षीरफ
लकश्चैवशीतलश्चवनस्पते ॥ त्वामाराध्यनरोविंद्यादैहिकामुष्मिकंफलम् ॥ इत्याचमनीयम् ॥
॥५॥ चलद्दलायवृक्षायसर्वदाश्रितविष्णवे॥ बोधितत्त्वायदेवायह्यश्वत्थायनमोनमः । इतिस्ना
नम् ॥६॥ एकादशात्मरुद्रोसिवसुनाथशिरोमणिः॥ नारायणोसिदेवानांवृक्षराजोसिपिप्पल ।
इतिवस्त्रम् ॥ ७ ॥ क्षीरदस्त्वंचयेनेहयेनश्रीस्त्वांनिषेवते ॥ सत्येनतेनवृक्षेन्द्रमामपि श्रीर्निषे
वताम् ॥ इतियज्ञोपवीतम् ॥८॥ श्रीखंडचन्दनंदिव्यंगंधाढ्यंसुमनोहरम् ॥ विलेपनंसुरश्रेष्ठगृ
हाणदेवपिप्पल॥ इतिगंधम् ॥९॥ यंदृष्ट्वामुच्यतेरोगैःस्पृष्ट्वापापैःप्रमुच्यते ॥ यदाश्रयाच्चिरंजी
वीतमश्वत्थंनमाम्यहम् ॥ इतिपुष्पाणि ॥ १० ॥ वनस्पतिरसोद्भूतः सर्वौषधिविजृंभितः ॥
आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् ॥ इतिधूपम् ॥११॥ साज्यंचवर्तिसंयुक्तंवह्निनायोजित

मया॥दीपंगृहाणदेवेशममज्ञानप्रदोभव॥इतिदीपम्॥१२॥ नैवेद्यंगृह्यतांदेवमेभक्तिंह्यचलांकुरु॥
ईप्सितंचवरंदेहिपरत्रेहपरांगतिम्। इतिनैवेद्यम्॥१३॥ आचमनीयंच। आयुःप्रजांधनंधान्यं
सौभाग्यंसर्वसंपदम्॥ देहिदेवमहावृक्षत्वामहंशरणंगतः॥ इतिपूगीफलम्॥१४॥ ऋग्यजुःसाम
मंत्रात्मासर्वरूपीपरात्परः॥ अश्वत्थोवेदमूलोसावृषिभिःप्रोच्यतेसदा॥ इतिदक्षिणा ॥१५॥
अश्वत्थयस्मात्त्वयिवृक्षराजनारायणस्तिष्ठतिसर्वकाले॥ अतःश्रुतस्त्वंसततंतरूणांधन्योसि
चारिष्टविनाशकोसि॥ इतिपुष्पांजलिम्॥१६॥ यानिकानिचपापानिजन्मांतरकृतानिच॥
तानिसर्वाणिनश्यंतिप्रदक्षिणपदेपदे॥ इतिप्रदक्षिणा॥ १७॥ एवंषोडशोपचारैःसंपूज्यपूर्वव
न्मधुपर्कादिदत्त्वाअन्तःपटंधृत्वामंगलाष्टकादिपद्यानिपठेत्॥ ततोऽश्वत्थायशर्मीदद्यात्।
तद्यथा देशकालौसंकीर्त्य वसिष्ठगोत्रोत्पन्नःचतुर्थीलालशर्माहंममेहन्मांतरे वा कृतसमस्तपाप
क्षयार्थं परमेश्वरप्रीत्यर्थम् अमुकशर्मणःप्रपौत्रीम्अमुकशर्मणःपौत्रीम् अमुकशर्मणःपुत्रीम् इत्य

नेनक्रमेणत्रिरावर्त्यश्रीअश्वत्थरूपिणेमहाविष्णवेइमांशमींकन्यावत्संवर्द्धितांश्रीरूपिणींयथाश
क्त्यलंकृतांतुभ्यमश्वात्थायाहंसंप्रददेइतिसंकल्प्यश्रीविष्णुःप्रीयतामितिजलमुत्सृजेत् ॥ अना
दिमध्यनिधनत्रैलोक्यपरिरक्षक ॥ इमांगृहाणत्वंशमीं विवाहविधिनेश्वर । इतिपठेत् ॥ ततो
दानप्रतिष्ठासिद्ध्येहिरण्यदक्षिणांसमर्प्य नीराजयित्वाशांतिसूक्तानिपठेत् ॥ ततोऽग्नेःपरिस्त
रणादिकृत्वाआघारादिद्वादशाहुतीर्हुत्वाद्वादशाक्षरेण वा अष्टाक्षरेण अष्टोत्तरशतमाज्याहुती
र्दत्त्वापूर्णाहुतिपर्यंतंकर्मसमाप्यआचार्यादिभ्योदक्षिणांदत्त्वाब्राह्मणान्भोजयेत् ॥ अन्यत्सर्वं
तुलसीविवाहवज्ज्ञेयम् ॥एवमेवधात्र्यश्वत्थयोर्विवाहोज्ञेयः ॥ अर्कविवाहस्तुधर्मसिंध्वादिषुस्प
ष्टः॥वृषभविवाहोवृषोत्सर्गपद्धतौज्ञेयः॥अस्यफलमुक्तंसनत्कुमारसंहितायाम् ॥धात्र्यश्वत्थौय
एकत्रपालयित्वासमुद्वहेत् ॥ ननश्यतेतस्यपुण्यंकल्पकोटिशतैरपि ॥ इत्यश्वत्थविवाहः ॥
इतिश्रीमन्महाराजाधिराजश्रीडूँगरसिंहात्मजश्रीगंगासिंहवर्मणोबीकानेरराज्यांतर्गतश्रीरत्नगढ

नगरनिवासिनाश्रीवसिष्ठगोत्रोद्भवेन श्रीरामकृष्णाऽमरचन्दपौत्रेणश्रीचतुर्भुजदत्तसूननाश्रीकस्तूरीचन्द्रात्मजेन श्रीमहादेवभक्तशुक्लयजुर्वेदीयमाध्यंदिनिवाजसनेयिनाश्रीचतुर्थीलालकर्मठाग्र्यकृतातुलस्यश्वत्थविवाहविधिः समाप्तः ॥ ॥ ॥ श्रीरस्तु ॥ ॥

॥ इति तुलसीविवाहविधिः समाप्तः ॥

ग्रंथ कारस्यजन्माङ्गम् ।





ग्रंथकारस्य[illegible]कः कल्पतरुवम् ।

॥ इति तुलसीविवाहविधिः समाप्तः ॥